कत्वात् यावद्वा देयं तावदादाय शाकल्यं कटकान्तरं जिताः एवमिहनां नरीयकत्वाद् बहुवचन राम

१४८

निर्द्देशः॥ क्रियते अविशेषेणौकशब्दान्तं अविशेषेणौकशब्दमिति वेद्यबहिसमासानामप्रसिद्धिः॥
अविशेषेणैकशब्दमिति विवेन यद्बहिर्नाम्यपरं संहितापामेकशब्दमिति भवतीति विवक्षायां॥ सि
अनिस्त्रन्नहि मिघनेपद्याम्यामसमेवान्तु॥ ननु वोतुं स्वरितामहित्यपा५ नां नाद्राम्रोनि॥
द्रमेगमेपमुनेमरम्वानिशुनिडि॥ अनेकमपीति वचनात्सिद्धं॥ अनेकमपि स्वरितानां५ २
मनुदात्तानामिति वचनाद्ध्रूकपारैकशब्दं वचनमिति॥ अविशेषेणाएकशब्दमिति वचनाद्य
बहिसमासानामप्रसिद्धिरिति॥ नैष दोषः॥ कथं॥ एकशेषनिर्द्देशात्॥ अनुदात्तस्य वा अनुदा
त्तपात्र अनुदात्तानां व अनुदात्तानामिति एवमपि प्रद्रुम्नतीनामेषेति प्राप्नोति प्रद्यु
म्नतिष्वेकशेषः परिसमाप्तिः॥ इत्येकवाक्यपरिसमाप्तिर्द्दहो कपोरपिमविप्यनि
॥०॥ अथ पञ्चकः॥ अथ पञ्चसंज्ञाप्यो हलरनएणस्यादिलोप हलो ग्रह हृत्यार्थः॥ अएकसंज्ञा॥
यां हलन हलांकनेयपएकहलप्रत्ययअएकेसंज्ञो भवतीति विवक्षायां॥ किंप्रयोजनं स्वादि

मा॰२ लोपेहलोऽग्रहणार्थं स्वादिलोपेहलोग्रहणं नकर्त्तव्यंभवति।हल्ङ्याब्भ्योदीर्घात्सुतिस्य
पृक्तंहलित्यपृक्तस्यलोपेवसिद्धे।आगितोऽलुगर्थं नर्त्यव्यग्रहणं।अन्यग्रहणंकर्त्तव्यम्।किंप्र
योजने।आगितोऽलुकिग्रहणंनकर्त्तव्यंभवति।एचसंधिप्राप्तस्येतोपृक्तेभिलुगपृक्तस्य
लोपेवसिद्धे।आगितोऽलुगर्थमितिचेद्दोतिप्रसंगः।आगितोऽलुगर्थमितिचेत्सतोतिप्रसंगो
भवति।इहापिप्राप्नोति।कांटाहृतेरपत्यंमाताभवकः।कांटाहृतज्ञिताभवनेमातृमात्र्या
नेभविष्यति।वचनप्रामाण्यात्।इतिचेत्।फाण्टाहृतपर्थंवचनंवचनप्रामाण्यादितिचेत्
फाण्टवत्यर्थमेतत्स्यात्फगतो माभूदिति।पैलादिषुवचनात्सिद्धं।यद्येतावत्प्रयोजनं
स्यात्पैलादिष्वेवपाठंकुर्वीत।तत्रपाठात्यो(?)इफपिफकोनिवृत्तिर्भवति।एवंसिद्धेसति
यद्यपिताशास्त्रेतनञ्जापयत्याचार्यः।नास्यलोपोभवतीति।जात्येनाऽनित्यइतिग्रहणात्। राम
निर्भवति अपृक्तसंज्ञायांहल्ग्रहणंकर्त्तव्यं स्वादिलोपेहलोग्रहणंनकर्त्तव्यं।आगितो॰

147

ल्लुकि ग्रहणं कर्त्तव्यं अल्ग्रहणे नैव क्रियमाणे नान्येषां शरीरग्रहणानि भवन्ति। अथ कस्मं
ज्ञायामल्लून्‌ ग्रहणं कर्त्तव्यं स्वादिलोपो हलन्‌ ग्रहणं कर्त्तव्यं कर्त्तव्यं। अणिञो ल्लुकि ग्रहणे
न कर्त्तव्यं भवति। अथ कस्मात्‌ कर्त्तव्यं न ज्ञानाकालिलाघवकृतो विशेषः। अथ कस्मिन्‌
विशेषः। अल्ग्रहणे क्रियमाणे एकग्रहणं न करिष्यते कस्मान्न भवति दीर्घविः। ज्ञाप्तविः अ
लेवपः प्रत्ययः। किं वक्तव्यमेतन्न हि कथमनुवर्त्तमाने गं स्पते। अल्ग्रहणात्‌ सामर्थ्यात्‌ पदि
यः अल्‌ वान्यश्च न तत्र स्यात्‌ हल्ग्रहणमनर्थकं स्यात्‌। हल्ग्रहणे क्रियमाणे एकग्रहणं न
करिष्यते कस्मान्न भवति दीर्घविः। ज्ञाप्तविः। हलेवपः। किं वक्तव्यमेतन्न हि कथमनुवर्त्तमाने गं
स्पते हल्ग्रहणात्‌ सामर्थ्यात्‌ पदिहि यो हल्वान्यश्च न तत्र स्याद्धल्ग्रहणमनर्थकं स्यात्‌। अथ
महल्ग्रहणात्‌ सामर्थ्यात्‌ पदिहि यो हल्वान्यश्च न तत्र स्याद्धल्ग्रहणमनर्थकं स्यात्‌। अथ स्य
द्धल्ग्रहणात्‌ स्पष्टयोः तने। हलन्तस्य यथा स्यात्‌ इजन्तस्य मा भूदिति एवं न हि भ्रिहि द्धलजिपद

लस्य ग्रहणे क्रियमाणे एकस्य ग्रहणं करोति न द्वयोः पयस्पार्श्वयोः अन्यत्र बहुसूत्रग्रहणे लानि ग्रहणं भव
ती ति किमर्थं मे नैस्मा ज्ञापने प्रयोजनं देभेर्हिल्ये ग्रहणास्य लानि वाचकत्वात् जि ङमितु ङमे नद्दुप
पत्रं भवति ॥ ॥ तत्पुरुषः ॥ ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः इति येन समासे का-
र्थत्वो दृश सिद्धिः ॥ तत्पुरुषः समानाधिकरणः कर्मधारय इति वेन समासे कार्थत्वात् संज्ञाया
अनुस सिद्धिः प्रकोप्य मर्थस्तत्पुरोषो नामाने कार्थाच्च प्रं वपुनः समानाधिकरणं सिद्धं तु
पदसमानाधिकरण ग्रह्णात् सिद्धमेन त्कथ तत्पुरुषः समानाधिकरणपद कर्मधारयः
संज्ञो भवतो निवन्त कंथं सिद्धिर्निरूढं नहि मिश्रनेयथा मासमेवास्तु न तु वो नेन तत्पुरुषः स
मानाधिकरणः कर्मधारय इति वेन समासे कार्थत्वाद्दृश सिद्धिरिति ॥ नेघरोषः प्रयतत्पु
रुषशदो स्तोप्राथमिक लिकः प्रथमिकैकपद्यमेकस्वपिमेक विभक्तित्वं वाति माद ष्यी
त्रा छत्वं तत्पुरुषाद्यानिपराविन तत्पुरुषद्वानि तपुरुषाद्य थ्यौ त्राघश्च पुंनसेन ग्रहणं ॥ प्र

थमानिर्दिष्टम्॥ प्रथमानिर्दिष्टं समास उपसर्जनमिति वेद्यं निर्देशात् प्रथमायाः समासे संज्ञा
प्रसिद्धिः। प्रथमानिर्दिष्टं समास उपसर्जनमिति वेदृनिर्देशात् प्रथमायाः समासे उपस
र्जनसंज्ञायाः प्रसिद्धिः। नहि कष्टादीनां समासे प्रथमां पश्यामः॥ सिद्धं तु समासविधा
ने वचनात्॥ सिद्धमेतत्कथं समासविधाने प्रथमानिर्दिष्टमुपसर्जनसंज्ञं भवतीति वक्त
व्यान्तत्र हि विभक्त्यन्तं न वक्तव्यं न वा तादर्थ्याद्द्वितीयादीनां वा नवावक्तव्यं किंकारतां तादर्थ्या
त्ताच्छब्द्यं भविष्यति समासार्थं शास्त्रं समास इति॥ यस्य विधौ प्रथमानिर्दिष्टं शास्त्रेणान्यत्रो
पसर्जनसंज्ञाप्रसंगः। यस्य विधौ प्रथमानिर्दिष्टं शक्यते तेनान्यत्रापि तस्योपसर्जनसंज्ञा
प्रमाणितराह्वः कुमुरी राजकुमारी षिनष्टि राहिसमासे द्वितीयादीनां प्रथमानिर्दिष्टं न स्यात्
ष्टीसमासे तूपसर्जनसंज्ञा प्राप्नोति। सिद्धं तु यस्य विधौ तं प्रतीति वचनात्। सिद्धमेतत्कथं
यस्य विधौ यत्प्रथमानिर्दिष्टं तं प्रति तदुपसर्जनसंज्ञं भवतीति वक्तव्यं तत्र हि विभक्त्यन्तम्

भा·प्र· न्ववक्तव्यं उपसर्जनमिति महतीयं संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः कुतो ह्येतत् लघ्वर्थं हि
संज्ञाकरणं तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम् अन्वर्थसंज्ञा यथा विज्ञायेत अप्र
धानमुपसर्जनमिति प्रधानमुपसर्जनमिति च संबन्धिशब्दावेतौ तत्र संबन्धादेतद्गन्तव्यं यं प्र
ति यदप्रधानं तेन तस्मिन्नुपसर्जनं भवतीति । अथ यत्र द्वयोर्बहूनां केनस्मात्तत्र प्रधानस्योपस
र्जनसंज्ञा न भवति राज्ञः पुरुषस्य राजपुरुषस्य । प्रधानत्वे दोषोऽप्युपसर्जनत्वं कं किमुक्तं च ष
[illegible] योः समासे षष्ठ्यामेव प्रधानस्य पूर्वनिपात इति एवं तर्हि नेव कृतं न त्वव ति उपसर्जने
पूर्वमिति । अथ षष्ठ्यामित्यत्र इति कस्मात् प्रधानस्य पूर्वनिपातो न भविष्यति यद्यपि तावदेतदुप
सर्जनकार्यं पारिहृतमिदमपरं प्राप्नोति राज्ञः कुमार्याः राजकुमार्याः गोस्त्रियोरुपसर्जन
स्येति ह्रस्वत्वं प्राप्नोति नैष दोषः । किमुक्तं पञ्चलिङ्गमिति [illegible] तत्र द्वयोर्ये शिक राम
स्य ह्रस्वत्वं प्राप्नोति ह्रस्वकस्य च वर्णं भविष्यति । एकविभक्ति । द्वितीयादीनां मध्ये नोप

149

सर्जनसंज्ञा प्राप्नोति तत्र को दोषः तत्रापूर्वनिपात इति पूर्वनिपातप्रतिषेधः सप्रयोजनताप्रति
षेधात्। नाप्येष प्रसज्यप्रतिषेधः पूर्वनिपाते नेति किं तर्हि पर्युदासोऽयं यदन्यत्पूर्वनिपातादि
ति पूर्वनिपाते अव्यापारः। यदि केवलं प्राप्नोति तेन भविष्यति पूर्वेण वा प्राप्नोति अप्राप्ते वा प्र
पूर्वो वा अनेन तावत्प्राप्तिः सा प्रतिषिध्यते कुत एतत् ननु तस्यापि विधिर्वा भवति प्रतिषेधो वा नि
वाग्राहिरपूर्वेति विज्ञातया भविष्यति न तु वैपंप्राप्तिः पूर्वा प्राप्तिं वाधते नोत्सर्गं हन्ते प्रतिषिद्धा स
तीवाधितुं॥ एकविभक्तावषष्ठ्यन्तवचने। एकविभक्तावषष्ठ्यन्तानामिति वक्तव्यमिह मा भूद्
द्विपिप्पल्या अर्द्धपिप्पलीति उक्तं वा किंतु कं परत्वं लिंगमिति शब्दशास्त्राविन्मोपदेशिकस्य
ह्रस्वत्वमानि देशिकस्यान्नवर्णमभविष्यति। कानि पुनरस्य प्रयोजनानि। प्रयोजनं। हिमुगुश्यामा
पञ्चालत्वे पूर्वोपसर्गाः कार्याः। द्विगुः॥ पंचगुः सप्तगुः द्विगुः। आमापञ्चा। शाकोली विकः शमली
विकः आपञ्चालीकामापञ्चाली विकः। शाकापन्ना अलंकुर्वा अलंकुमार्यै अलंकुमारिः। उप

अधातुरिति किमर्थं ॥ अहन् वृत्रं ॥ अधातुरिति शक्यमवक्तुं ॥ कस्मान्न भवति अहन्वृत्रमिति ॥

भा०१ सर्वार्थाः कार्येभिः कोशं विः निर्वासतामिति ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वि
तीयचरणे प्रथममाह्निकं ॥ ॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ ॥ अर्थवदिति किम
इत्याद्यवसितानां वर्णानां मा भूदिति ॥ किं च स्यात् वनं धनमिति ॥ नलोपः प्रातिपदिकान्तस्येति नलो
पः प्रसज्येत ॥ आचार्यप्रवृत्तिर्ज्ञापयति न धातोः प्रातिपदिकसंज्ञा भवतीति यदयं उपेयधातु
150 प्रातिपदिकयोरिति धातुग्रहणं करोति ॥ नैतदस्ति ज्ञापकं शनिषिद्धार्थमेतत्स्यात् ॥ अपि-
का कः श्रुणेनाय नेदृशितिः अप्रत्यय इति किं ॥ काण्डे कुण्डे अप्रत्यय इति शक्यमवक्तुं ॥ कस्मान्न भवति
काण्डे कुण्डे इति ॥ कृत्तद्धितग्रहणं नियमार्थं भविष्यति ॥ कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रा
तिपदिकसंज्ञा भवति नान्यस्येति ॥ अथ वचनेऽनेकपदस्य संगः ॥ अर्थवदिति प्रातिपदिक
संज्ञायामनेकस्यापि पदस्य प्रातिपदिकसंज्ञा प्राप्नोति दशदाडिमानि षडपूपाः कुण्डम राम
जाजिनं पललपिण्डः अधरोरुकः एतत्कुमार्याः स्फैयकृतस्य पिता इति ॥ शिनदिति ॥ सङ्

दायोत्रानर्थकः। समुदायो नर्थक इति चेदवयवार्थवत्त्वात् समुदायार्थवत्त्वं यथा लोके। स
मुदायो नर्थक इति चेत् अवयवार्थवत्त्वात् समुदायार्थवत्त्वं अवयवैरर्थवद्भिः समुदाया
अप्यर्थवन्तो भवन्ति। यथा लोके। न यथा लोके आढ्यमिदं नगरमित्युच्यते न च सर्वे तत्रा
ढ्या भवन्ति। सर्वे वा गोमन्तः। यथा लोके इत्युच्यते लोके चावयवा एवार्थवन्तो न समुदायः। आ
आनर्थक्यादवयवा एवार्थवन्तो न समुदायाः। यस्य हि भूतद्रव्यं भवति स तेन कार्यं करोति। एस
ता गावो भवन्ति। सन्ति तासां क्षीरं घृतमुपयुञ्जते। न तद् दृष्टमप्यशक्यं कर्तुम्। तस्मात् हि पंचावा वायुक्तिः
आढ्यमिदं नगरं गोमदिदं नगरमिति। मिथ्यावावायुक्तिः। इह नावयवाढ्यं नगरमित्येकारोमन्द
ष्टा यः आढ्या आढ्यमिति संतिन दृष्टमाढ्यमिति। गोमदिदं नगरमिति। मत्वेतान्मत्वर्थीयो नानुप
नो। एवमपि वाक्यस्य प्रतिषेधो वक्तव्यः। वाक्यस्य प्रातिपदिकसंज्ञाप्रसङ्गः। इति चेद्धेवभक्तव्यः दे
वदत्त गामभ्याज शुक्लां देवदत्त गामभ्याज कृष्णामिति। किं कारणं अर्थवत्त्वात्। अर्थवद्धी म

१४

भा०१ द्वाभ्यां न वै हि पदार्थादन्यस्यार्थस्योपलब्धिर्भवति। वाक्ये पदार्थादन्यस्यानुपलब्धिरिति चेत्पदार्था-
151 भिसंबंधस्योपलब्धिः तस्मात्प्रतिषेधः। पदार्थादन्यस्यानुपलब्धिरिति चेत् इदमुच्यते पदा-
र्थाभिसंबंधस्योपलब्धिः तस्मात्प्रतिषेधः। पदार्थादन्यस्यानुपलब्धिरिति चेत् इदमुच्यते प-
दार्थाभिसंबंधस्योपलब्धिर्भवति वाक्ये। इह देवदत्त इत्युक्ते कर्ता निर्दिष्टः कर्म क्रियागु-
णो वा निर्दिष्टो। गामित्युक्ते कर्म निर्दिष्टं कर्ता क्रियागुणो वा निर्दिष्टो। आनयेत्युक्ते क्रिया
निर्दिष्टा कर्तृकर्मणी गुणाश्च निर्दिष्टाः। शुक्लामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मणी क्रिया वा
निर्दिष्टा। इह हे दानीं देवदत्त गामभ्याज शुक्लामित्युक्ते सर्वं निर्दिष्टं देवदत्त एव कर्ता नान्यः कर्ता गा-
मेव कर्म नान्यत्कर्म अभ्याजेव नान्या क्रिया शुक्लामेव न कृष्णामिति। एतेषां पदार्थानां सामा-
न्येन वर्तमानानां यद्विशेषेवस्थानं स वाक्यार्थः। तस्मात्प्रतिषेधः। तस्मात्प्रतिषेधो वक्तव्यः। राम
न वक्तव्यः। अर्थवत्समुदायानां समासग्रहणं नियमार्थं। अर्थवत्समुदायानां समासग्रहणं।

नियमार्थं भविष्यति। समास एवार्थवतां समुदायानां प्रातिपदिकसंज्ञो भवति। नान्य इति।
एतेन नियमः क्रियते प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति। बहुपटव उ
च्चकैः नीचकैरिति। किं पुनरत्र प्रातिपदिकसंज्ञाया प्रार्थ्यते प्रातिपदिकादिति स्वाद्युत्पत्ति
र्यथा स्यादिति। नैष दोषः। पठेवात्र प्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न भवति एवं लुगपि न भविष्य
ति। तत्रैव कार्यं वेत तदा त्रिनो विभक्तिस्तस्या एव श्रवणं भविष्यति। नैवं शक्यं। स्वरे हि दोषः स्यात्।
बहुपटव बहुपटवे स्वरः प्रसज्येत बहुपटव इति येऽस्यन्ते। उच्चकैरिति योऽवाद्यः विन्नः सप्रकृतेर्वा
ऽकल्लिष्यति। नत्वेतदुनर्लुप्ता यस्यान्या विभक्तिस्तस्य नेतस्याः प्रकृत्यनेकदेशत्वादेतेनो
प्रातिपदिकत्वेन भविष्यति एवं तत्वावार्थवत्त्वात्तिलोपः प्राप्नोति भवति प्रकृतिप्रत्ययसमुदायस्य प्राति
पदिकसंज्ञेति परत्वात्प्रत्ययस्य इति शक्तिबेधं शास्त्रि सवर्णदेनशक्ति बेधः सवर्णहितापकार्थः
प्रत्ययग्रहणे शक्तिबेधो वक्तव्यः। ननु वावश्यं शास्त्रस्थो पि वक्तव्यः नास्ति शास्त्रस्य र्थेन कृत्तद्धितग्रहणं

भा०१ ॥ं नियमार्थं भविष्यति कृत्तद्धितान्तस्यैव शब्दप्रयान्तस्य प्रातिपदिकसंज्ञा भविष्यति नान्य
स्य शब्दप्रयान्तस्येति ॥ स एवोन न्यायः ॥ शब्दप्रयाप्रतिषेधो वक्तव्यः ॥ प्रकृतिप्रत्ययसमुदाय
स्य वा प्रातिपदिकसंज्ञा वक्तव्या ॥ उभयं न वक्तव्यं तुल्यजातीयस्य नियमः कथं तुल्यजा
तीयः प्रत्याहारो ये कारान्तो वमसमासः कथंजातीयकानां समासः ॥ सुबन्तानां ॥ सुप्तिङ् समु
152 दायस्य नाहि प्रातिपदिकसंज्ञा प्राप्नोति ॥ सुप्तिङ् समासस्यापि प्रातिपदिकसंज्ञारम्भ
ते ऽलहिकम्भि ॥ बहुलमभातेः राकोकर्णां स्वामिदधाति ॥ एतन्नियमार्थं भविष्यति ॥ एतस्यैव
सुप्तिङ् समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति ॥ तिङ् समुदायस्य नाहि प्राति
पदिकसंज्ञा प्राप्नोति ॥ तिङ् समुदायस्यापि प्रातिपदिकसंज्ञारभ्यते ॥ आख्यातमाख्या
तेन क्रियासातत्ये इत्येतन्नियमार्थं भविष्यति ॥ एतस्यैव तिङ् समुदायस्य प्रातिपदिकसं राम
ज्ञा भवति नान्यस्येति ॥ अश्नीतपिबता ॥ पचतभृज्जता ॥ पपचतेके वलेनाववनाता ॥ अश्नीतपिबताहसाशवृस्य

नोपपद्यते किंकारणं केवलेनावचनात् न हि केवलेन वृक्षशब्देनार्थो गम्यते केन तर्हि सप्रत्य
यकेन । नवा प्रत्ययेन नित्यसंबंधात्केवलस्याप्रयोगः ॥ नवा एष दोषः किंकारणं प्रत्यये
नानित्यसंबंधात् नित्यसंबंधावेनावयवौ । प्रकृतिः प्रत्यय इति प्रत्ययेन नित्यसंबंधात्के
वलस्याप्रयोगो न भविष्यति ॥ अन्यद्वान्यच्छः अन्यप्रायष्टाघान्यच्छः कोविसनाराव
चेत् अर्थवत्त्वं नोपपद्यते केवलेनावचनादिति भवान्मन्यते अभिप्रायः इतः ततः केवलस्याप्रयोग
हेतुमाह एवं च किल नाम कृत्वा नोद्यते समुदायस्यार्थवत्त्वयोगात् एवमप्यवा नामसु स्ति द्विविधेन
सिद्धं तत्र यन्वयव्यतिरेकाभ्यां सिद्धमेतत् कथम् अन्वयव्यतिरेकाभ्यां कथमन्वयः पान व्यतिरेकाश्चाकोसी
वच्चयोर्व्यतिरेको वा । इह वृक्ष इत्युक्ते कश्चिच्छब्दः श्रूयते वृक्षशब्दः कारान्तः सकारश्च प्रत्ययः अ
र्थोपि कश्चिद्गम्यते मूलस्कंधफलपलाशवान् एकत्वं च । वृक्षावित्युक्ते कश्चिच्छब्दो हीयते के
श्चिदुपजायते कश्चिदन्वयी सकारो हीयते औकार उपजायते वृक्षशब्दोऽकारान्तोऽन्वयी अर्थो

भा०२ पि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी। एकत्वं हीयते द्वित्वमुपजायते मूलस्कंधफलपलाशान्वा

153 न्वयी। ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते। यः शब्द उपजायते तस्या
सावर्थो योऽर्थ उपजायते। यः शब्दोऽन्वयी तस्यासावर्थो योऽर्थोऽन्वयीति। विषम उपन्या
सः। बहवो हि शब्दा एकार्था भवंति। तद्यथा इंद्रः शक्रः पुरंदरः। कंदुः कोष्ठः कुसूल इति। एक
श्च शब्दो बह्वर्थः। तद्यथा अक्षाः पादा माषा इति। अतः किं न साधीयोऽर्थवत्ता सिद्धा भवति।
नापि ब्रूमः अर्थवत्ता न सिध्यतीति। वर्णितार्थवत्ता अन्वयव्यतिरेकाभ्यामेव। तत्र कुत एतद
यं प्रकृत्यर्थः अयं प्रत्ययार्थ इति न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्। प्रत्यय एव वा।
सामान्यशब्दा एते एवं स्युः। सामान्यशब्दाश्च नांतरेण प्रकरणं विशेषं वा विशेषेष्ववति
ष्ठंते। यतः खलु नियोगतः वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिद्विशेषे वृक्षशब्दो वर्तते। यत
तो मन्यामहे नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्य

पः प्रत्ययस्येति किं पुनरिमे वर्णा अर्थवंत आहोस्विदनर्थकाः वर्णा ह्यर्थवद्[illegible]कार्यर्थ
त्वंतं किमुक्तमर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थ
दर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वाच्च
मेवानस्यैकार्थ्यान्नुवभावो वर्णाऽनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेर्वर्णव्यत्ययापायो
पजनविकारेष्वर्थदर्शनादिति तत्र समपरिहृतं संघातार्थवत्त्वाच्चेति नस्यापि परिहा
रः संघातार्थवत्त्वाच्चेति चेद्दृष्टोऽप्यनर्थेन गुणेन गुणिनोऽर्थभावः संघातार्थवत्त्वाच्चेति
चेद्दृश्यते ह्येतदर्थेनापि गुणेन गुणिनोऽर्थभावः तद्यथा एकस्तन्तुस्त्वक्त्राणेऽसमर्थस्त
त्समुदायश्च कम्बलः समर्थः एकश्च तण्डुलः प्रस्थनिधानेऽसमर्थस्तत्समुदायश्च द्रो
णकं समर्थम् एकश्च बल्वजो बन्धनेऽसमर्थस्तत्समुदायश्च रज्जुः समर्था भवति विषम उ
पन्यासः भवति हि तत्र या च यावती चार्थमात्रा भवति हि किंचित्प्रत्येकं तन्तुस्त्वक्त्राणे

प्रातिपदिकत्वं। निपातस्यानर्थकस्य प्रातिपदिकसंज्ञार्थं कृत्वा एवं जाति निरर्थं प्राति नं वत्ते
प्रलेयते किं पुनरेतत् ४

भा०२ समर्थः एकश्च तण्डुलः तुषप्रतिघाते समर्थः एकश्च बल्वजो बन्धने समर्थ इति ये पुनर्वर्णा
अत्यन्तमेवानर्थकाः॥ यथा तर्हि रथाङ्गानि विहृतानि प्रत्येकं व्रजिक्रियां प्रत्यसमर्था
नि भवन्ति तत्समुदायश्च समर्थः एवमेतेषां वर्णानां समुदाया अर्थवन्तोऽवयवा अ
154 नर्थकाः इति॥ निपातस्यानर्थकस्य प्रातिपदिकसंज्ञाशार्थानो। प्रातिपदिकादिति
स्वाद्युत्पत्तिः सुबन्तं पदमिति पदसंज्ञा पदस्य पदादिति निघातो यथा स्यात्। नैतद
स्ति प्रयोजनं। सत्यामपि प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणं। न
हि प्रातिपदिकसंज्ञामेव स्वाद्युत्पत्तिः प्रतिबद्धा। किं तर्हि एकत्वादिष्वर्थेषु स्वादयो वि
धीयन्ते न चैषामेकत्वादयः सन्ति। नैष दोषः। अविशेषेणोत्पद्यन्ते उत्पन्नानां नियमः क्रि
यते। अथवा प्रकृतानर्थानपेक्ष्य नियमः केवलप्रकृता एकत्वादयः एकस्मिन्नेवैकवच राम
नं न द्वयोर्न बहुषु द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु बहुष्वेवार्थेषु बहुवचनं नैकस्मिन्न

द्वयोरिति अथवा वार्थग्रहणं निर्द्धापयति अनर्थकानामप्येषां नवार्थवक्तृत्वमिति परस्य
मपि परो ऽनर्थको विधिर्न योगितुपसर्गसंज्ञा वाधितं को कमिह्ववचनो यत संज्ञा शास्ति ।
अथ शास्त्रयस्य इति किं पर्युदासो यस्त्यस्य प्रत्यया दिति आहा विन्दुसमस्त प्रतिषेधः प्रत्यय
नितिकानां सूत्रविशेषः । अथ प्रत्यय इति वेत्ति विकारे शोषति षेधो नवलानां । अथ प्रत्यय इ
ति वेत्ति विकारे शोषति षेधो वक्तव्य । कोऽड्कुट । किं कारणं । अनवलानां निवर्तिपरे कार्ये शेः
ग्रातिपः अनवधानस्यादि स्वनाम्नि परनिकुलो शनिपादिकसंज्ञा शमोति । अस्मान्न इति प्रसज्य
प्रतिषेधः प्रत्ययोनानत्र प्रत्ययइति वेदू इ कारे शो प्रतिषेधः स्यादिवलानां न प्रत्यय इति
वेदू इ कारे शो प्रतिषेधः शामोति । व्रह्मवेदूः जोववधूः किं कारणं आदिवत्वान् प्रत्ययात्
त्यय यो रेक देशः प्रत्ययस्यादिव द्भावादनन्तर प्रत्ययान्ते नित्य प्रतिषेधः प्रसज्यते । किंतु नरस्य
ग्रातिपदिक संज्ञा प्रयाशासनिते प्रातिपदिकादिति लाघुत्पत्तिर्यथा स्यान दुतिनेषदोषः ॥

भा०२ आचार्यप्रवृत्तिर्ज्ञापयति नेडुत्पत्तेगङेनामवारद्यद्गुति यदयं नोङ्धात्वोरिति विभक्तिस्वर
स्यप्रतिषेधं शास्ति। अथ बाहुघ्नप्रातिपदिकसंज्ञा अवयवस्यापि समुदायस्यापि
नेत्यावयवस्य प्रातिपदिकसंज्ञा न योनवद्भावात्तत्वाधकम्पत्तिर्भविष्यति। समुदायेऽपवय
यप्रत्ययलक्षणत्वात् समुदायेऽपवप्रत्ययलक्षणेन प्रातिपदिकसंज्ञायाः प्रत्ययो नेति
155 प्रतिषेधः प्राप्नोति। राजानं स्यादिति प्रत्ययलक्षणेन प्रत्ययो नेति प्रतिषेधः प्राप्नोति॥
नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन प्रतिषेधो भवतीति। यदयं
नङिसंबुद्ध्योरिति संबुद्धौ प्रतिषेधं शास्ति। अथवा पुनरस्त्वकृपकिरामः। नन्वोक्तं प्र
त्ययवृत्तिये त्रिवेकादेश प्रतिषेधो तावत्वादिति न पमत्प्रतिषेधे पपराछवे घत्र
प्रातिपदिकसंज्ञेऽवयवस्यापि समुदायस्यापि। उत्पत्तिर्प्रातिपदिकात्प्रातिपदिकं कैः राम
देशः प्रातिपदिकं ग्रहणेन तस्मादुभाभ्यामेव वक्तव्यं स्यात् ह्रस्वो नपुंसके प्रातिपदिकस्येति किं

वनपुंसकेनपुंसकंपरस्यगुणाःकस्यवनपुंसकेगुणःप्रातिपदिकस्य॥ ॥कृत्तद्धितसमा-
साश्च॥ ॥समासग्रहणंकिमर्थं।समासस्यग्रहणोऽत्रके।किमुक्तंअर्थवत्सूत्रेणयत्नानां
समासग्रहणंनियमार्थमिति॥ ॥ह्रस्वोनपुंसके॥ ॥प्रातिपदिकग्रहणंकिमर्थं
र्थं।नपुंसकह्रस्वेप्रातिपदिकग्रहणंनियमार्थं।नपुंसकह्रस्वेप्रातिपदिकग्रहणंक्रि-
यते।किंकारणं।नियमार्थं।नियतस्यह्रस्वत्वंमाभूदिति।काण्डेकुड्येस्मनेब्राह्मणकुलमि
ति।अव्ययप्रतिषेधश्च।अव्ययानांप्रतिषेधोवक्तव्यः।दोषाब्राह्मणकुलंदिवाब्राह्मण-
कुलमिति।तर्हिवक्तव्यः।नवक्तव्यः।नात्राव्ययंनपुंसकेवर्त्तते।किंतर्ह्यधिकरणमत्राव्यय-
नपुंसकस्य।इहतर्हिप्राप्नोति।काण्डीभूतंवृषलकुलंकुड्यीभूतंवृषलकुलमिति।नैवालिङ्गा-
भावात्।नवावक्तव्यं।किंकारणं।लिङ्गाभावात्।अलिङ्गमसंख्यमव्ययंपरिपिठ्नरणमसंख्येयप
रिहारः।आहोस्विन्निर्वृत्तस्यापि।निवृत्तस्यापि।न्याहकथंअव्ययंकिंविद्धिमन्त्रशेषः।

भा० १ नं किंचित्क्रियापदश्रूयानं च्छ्रैनी वैरि निविभक्त्यार्थं श्रूयाने हि न कृष्ठ्य गि निक्रियापश्रूयानां निवेत
वापि किंचिद्विभक्त्यार्थं श्रूयानं किंचित्क्रियापश्रूयाने कारे कुर्व्वे इति विभक्त्यार्थं श्रूयाने रमे ने द्वा
म्नाते कुलमिति निक्रियापश्रूयाना न वैनपोर्थे पोर्लिंगसंख्याभ्यां योगो ज्ञि आश्रवस्यं येन
देवेन्द्रे ते पाकियमाणे हि शानिपादिकस्य हलो इह शसल्वेन कोउ कुर्व्वे इति छन्द श्रानिपादि
150 कसंज्ञे अवयवस्यापि समुदायस्यापि प्राप्ते यद्येवं प्रातिपदिकाप्राप्ति पादिके परे कारेशः प्रा
तिपदिकस्य हलो नन्तस्मात्तु नाम्नो केवलक्तं यस्मात् न हस्तो न वुसके यत्रस्य तिङ् किं वनवे हे
पु किनेसंकयपस्य गुणः कस्य वनवुसके गुणः प्रातिपदिकस्य पत्रे कारे शशो घिलेषु प्रति
षेधः पत्रे कारे शशो घिलेषु प्रति षेधो वक्तव्यः गुणवद्राप प्रगवस्नाशं प्रगवसे कृपुगव
स्नेभ्यः पत्रे कारे शशो घिलेषु वहिरंगलक्षणात्वात् सिद्धो वहिरंगा एतेन विषय प्रक्रमेनर गंकृस ले राम
अ सिद्धं वहिरंगमन्तरंगे न जस्त्रिषो उपसर्जन ह्रस्वत्वे व किं पत्रे कारे शशो घिलेषु प्रति

षेयो वक्तव्यः। अतिखट्वाय अतिखट्वार्थः [illegible] अतिखट्वे भाः उपसर्जनह्रस्वत्वे यदि बहि
रंगलक्षणत्वादसिद्धमित्येवं बहिरंगलक्षणनिविषयः अन्तरंगह्रस्वत्वेऽसिद्धे बहिरंगमं
तरंगे। गोटाङः ग्रहणं कृत्रिमस्यार्थं। गोटाङः ग्रहणं कर्तव्यं। किमिदं स्तोकं गाङ्कुः मिश्रस्या
हारः। ग्रामसन्निवेष्टानां ग्रामाहारः। राय्यः श्मश्रुमिश्रा भ्रुकुटीङ्करायिमा। किं प्रयोजनं कृत्रिम
स्यार्थं कृत्रिमस्याकृत्रिमस्य च ह्रस्वत्वे माभूदिति। अतितन्त्रीः अतिलक्ष्मीः अतिभूः श्र
तिश्रीः॥ तत्राहि वक्तव्यं न वक्तव्यो। स्त्रीग्रहणं स्वर्यते तेन स्वरितेनाधिकारगतिः
भवतीति स्त्रीप्रत्यये एवं प्रकृत्यर्थे विहिता स्त्री। गोग्रहणं विस्पष्टं स्वरितेनाधिकारगति
र्भवतीति न दोषो भवति। निपात एवं प्रत्ययग्रहणमिदं भवति तत्र प्रत्ययग्रहणे यस्मात्
तदादेर्ग्रहणं भवतीति इह न प्राप्नोति अतिराजकुमारिः अतिसेनानीकुमारिरिति। अ
तिधीवरसेनेति नैवं तन्नेष्यते। ईयसो बहुव्रीहौ पुंवद्वचनं। ईयसो बहुव्रीहौ पुंवद्वक्तव्यो वक्तव्यः॥

स्पर्धी समासनिरपेक्षो गोनिरपेक्षार्थं तावत् गोकुलंगोसी
रंगोपाल [illegible] ॥ समासनिरपेक्षार्थी

भा०२ बहुश्रेयसोपसर्जनस्य बहुश्रेयसी अविद्यमानश्रेयसी । पूर्वपदस्थनिषेधो गोसमासनिरपेक्षा-
र्थः ॥ एवं परस्य च प्रतिषेधो वक्तव्यः । किं प्रयोजनं । गोसमासनिरपेक्षार्थः । गोनिरपेक्षार्थं राज-
कुमारीपुत्रः सेनानीकुमारीपुत्र इति किमुच्यते समासनिरपेक्षार्थ इति न पुनः समासोपि
किं विग्रहवर्त्पदं यदर्थः प्रतिषेधः स्यात् ॥ गोन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवती-
157 त्युच्यते न वान्तरेण समासं गोन्तं प्रातिपदिकं उपसर्जनमस्ति न तु बहुमस्ति खट्वापा-
दो मालापाद इति एकारे शोङन्तं नादिवद्भावात्प्राप्नोति । न भवतस्तत्राश्रयेणान्तादिवत्
गोनिरपेक्षार्थेन नावधार्थः ॥ गोन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते
न चैतन्नस्ति ॥ ननु चैतदपि व्यपदेशिवद्भावेन गोन्तं व्यपदेशिवद्भावो प्रातिपदिकेनास-
मासनिरपेक्षार्थेनापि नार्थः स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते प्र- राम
धानमुपसर्जनमिति संबंधिशब्दावेतौ न चात्र संबंधं पादेन [illegible] यं प्रतिपद [illegible] नन्तस्य वे

हृदेव३ कपिय१

स्रोनोभवतीतिअवश्यंवैनदेवंविज्ञेयंऽव्यमोनपिहिश्रुतिषेदइहप्रसङ्गेनपंचकुमार्यः।प्रिय
अस्यपंचकुमारीप्रियः२शकुमारीप्रियःकपिवश्रुतिषुयोवकन्यःवहुकुमारीकःव हु
हुघलोकः हृदेवयश्रुतिषुयोवकव्यःकुकुटमहूर्योगकंवाकिंमुकोकपितावहुकंनकपी
तिश्रुतिषेयइति॥नैतदस्मुकंकणाद्दीतियाहूल्वशास्त्रिःनस्याःश्रुतिषुयःकुन एतद्दनंतरस्मा
द्विविभेयानिश्रुतिषुयोवाअवश्यंवैनदेवंविज्ञेयंयोहिमन्यतेयावयावती हस्तशास्त्रिःसर्व
स्याःश्रुतिषुयइतिइहापिजनस्यश्रुतिषुयःप्रसङ्गेनप्रियंथामणिवासालएकुलमस्यप्रिय
सामाणिकः।प्रियसेनानिकः२इंतल्लुकंकपिकुमेनेनपलाद्धस्वलेनभविष्यतिइहमिह
संश्रयार्थंकश्चक्रियतान्द्धस्वलमितिकिमत्रकर्त्तव्यंपरलोकवेनरंगोद्धस्वलोऽभ्यंतरंगः कथ तर
मनुवायकप्रमामासात्रइस्तुव्यतोनादर्थान्नाघ्छलंयभविष्यतियेषांपदानामसमासःनतो
वंत्रेषामन्यद्वातिकपंतावन्यतीसन्नेद्वंदेषुकंकिमुकंपरवल्लिंगमितिशुद्दशाद्वविति

लुक्तद्धित॰। तद्धितलुक्यवन्त्यादीनां प्रतिषेधो वक्त॰ प्रा॰। अवन्ती कुन्ती कुरू॰। १

भा॰१ नत्रौपदेशिकस्य ह्रस्वत्वं आनिर्देशिकस्य श्रवणं भविष्यति ॥ ... द्धितलुकावंत्यादीनामप्रति-
षेधो ऽलुक्कारत्वात् ॥ तद्धितलुक्यवन्त्यादीनां प्रतिषेधोऽनर्थकः प्रतिषेधो ऽप्रतिषेधः ॥ लुक्क-
स्मादत्र भवति अलुक्कारत्वात् न लुकी लुप्यतेनेन वात्र लुकं पश्यामः लुक्कोऽपि नैष्टापरस्मात्मा शक्य-
विज्ञातुं न हि लुक्कापो वृपरिष्यमल्लिकाजहि सप्तम सप्तमी लुकि सनीति सप्तम सप्तमि वेत्या ऽश्रोनि-
158 एवं तर्हि इदमिह व्यपदेशं सदाचार्यो न व्यपदिशति किं नु पसर्जनस्येति वर्ण्णेने वरलानि-
तुपसर्जनं ॥ इन्द्रोऽगणाः ॥ इन्द्र ऐयाने नितंबकं वागोण्यानेनैवं सिद्धिनार्थ इस्त्रियनेना का-
रूपसिद्धिः ॥ मंदमोगाः दशगोणिः ह्रस्वता हि विधीयते ॥ गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं
म...त्र विधीयते । इति नावावबनेनावता इति दिवाकौऽपि नेमि वाको श्व...त्र विशेषः ॥ मात्रार्थे
वा कृतं भवेत ॥ अथवा मात्रार्थ्ये मतेन द्वृ एव्ये गोणिमात्रे गोणिः ॥ अपर आह ॥ आशिष्यं गोण्या दाम
इत्येव प्रकरणात् ॥ आशिष्यं गोणापाइत्वं किं कारणं प्रकरणान् प्रकृतं ह्रस्व इति वर्त्तते इति न

त्तरस्याः स्याद्यर्थमत्थापि वा मल्याद्यर्थमिदं दृष्टं ओपंचल्लविंशतिरशासूयि:। इडमोप्याने
तिवक्त्वं हस्वनाहि विधीयते। इति वा वचनेनावन्माशार्थं नामनमेव न गोण्यादेवेप्र
करणात् मल्याद्यर्थमत्थापि वा॥ ॥लुपियुक्तवत्॥ ॥व्यक्तिवचने इति किमर्थं। शिरीषा
णां मदूरभवो ग्रामः शिरीषाः तस्य ग्रामस्य वने शिरीषवने किं वस्माद्धि माभ्यां षष्ठि व
नस्य जिम्म इति णत्वं प्रसज्येत। अपर आह कटुवदर्या अदूरभवो ग्रामः कटुवदरी। षष्ठी
युक्तवद्भावेन माभूदिति। अथ व्यक्तिवचने इत्युच्यमानेपि कस्मादेवात्र षष्ठी न भवति य
आपि वचनं नेदं पाति भाषिकस्य वचनस्य ग्रहणं किं न हि। अत्रार्थग्रहणात्तु च्यमाने वचनमि
ति एवमपि षष्ठी प्राप्नोति षष्ठ्यापि व्यक्त्युच्यमाने लुपोक्तत्वात् तस्याभिसंबंधस्य द्विगो यस्याः श्रयो
गोणेन मंतव्यः किं कारणं तंत्रस्या र्थो न मत्वयोग इति। आनिर्देशिको न हि प्रमोजि एवं
न हि ग्रागापिवक्तन्नैपर्कं वापोह यवनापुर्कं वक्तुमशक्यं कामचारः शास्त्रेन लिंगसंख्ये प
गै१
पि २

शागपिकृन्नेर्युक्तंवनस्पतिभिर्निगरावृन्नवापि युक्तंवनस्पतिभिर्निगरंकृन्नेर्वा युक्तं (युक्तंरे) वकृत्वाको
विधीयते। कामवारः स्यात्।

भा०२ शागपिकृन्नेर्युक्तंवनस्पतिभिर्निगरावृन्नवापीह[redacted]युक्तंवनस्पतिभिर्निगरंकृन्नेर्वो वनुक्थ
कामवारः [redacted] ःश
गकृन्नेर्यलिंगसंख्यो नेआतिदेशुकृन्नस्यवाये लिंगसंख्येनेयावताकामवारः ततः कृन्नस्य
येलिंगसंख्येनेआतिदेशोनेनप्रागकृन्नेर्यो। किमर्थवुनरिदमुच्यते अनन्त्राभिधेयस्य व्य
क्तिवचनभावाद्धुपियुक्तवदनुदेशः। अनन्त्राभिधेयवाह्निंगवचनानिस्फाच्यवलुकि लवणः
159 सूपः लवणांशाकंलवणायवागूरिति। अनन्त्राभिधेयवद्धक्तिवचने[redacted]
यवाह्निंगवचनानिशाभुवेतिइष्यानेवाभिधानवच्चाकारितिनश्चोतरेलोपलंनसिध्यतीति
लुपियुक्तवदनुदेशः एवमर्थमिदमुच्यते अस्तिहयोनमेननकिंतहिभिलुपोदर्शनसंज्ञि
त्वादर्थगतिर्नोपपद्यते लुप्रनामेयमदर्शनस्यसंज्ञाक्रियते नवारदर्शनस्य लिंगसंख्येश १२५
क्यअतिदेष्टुंलुपः अदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते नवाऽदर्शनस्याशक्यत्वादर्थग

निभवंतिलुकिः इहाप्याविये

निःसाहचर्यातानवैषदोषः॥ किंकारणं॥ अदर्शनस्याशकलानात्यदर्शनस्यालिंगसंरम्भेऽशक्ये
अतिदृष्टमितिकृत्वाऽदर्शनिसहचरितोयोर्थस्तस्यगतिर्भविष्यतिसाहचर्यात्॥ योगाभावे
श्वा॰यस्याग्रन्यस्यादर्शनेनचयोगोनास्तितिकृत्वाऽदर्शनेसहचरितोयोर्थस्तस्यगतिर्भवि
ष्यतिसाहचर्यात्समासतत्पुरुषस्यवहुवचनस्यलुपः॥ समासेऽत्तरपदस्येवहुवचनस्य
लुपः॥ पुत्रवद्भावोवक्तव्यः मधुरापंचालाः॥ किंप्रयोजनं नियमार्थं समासेऽनुत्तरपदस्थे
वहुमाभूत्पंचालमधुराः विशेषणानांचाजातेः॥ कथमिदंविज्ञायतेऽजातिर्याद्विशेषणा
मिति॥ आहोस्वित्जातेर्यानिविशेषणानीति॥ किंचातः॥ यदिविज्ञायतेऽजातिर्यद्विशेषणमि
तिसिद्धंपंचालाजनपदः सुभिक्षः संपन्नपानीयः वहुमाल्यफलइतिनसिध्यति॥ अथवि
ज्ञायतेजातेर्यानिविशेषणानीतिसिद्धंसुभिक्षः संपन्नपानीयः वहुमाल्यफलइतियावा
लाजनपदइतिनसिध्यति॥ एवंतर्हिनैवंविज्ञायते ऽजातिर्यद्विशेषणमितिनापिजातेर्या
ने

भा० १ निर्विशेषणानीति । किं तर्हि विशेषणानां युक्तवद्भावो भवति । आजातेः । प्रयोगात् किम
र्थं पुनरिदमुच्यते विशेषणानां वचनं जातिनिवृत्त्यर्थं । जातिनिवृत्त्यर्थोयमारंभः ॥ कि
मुच्यते । जातिविशेषणनिवृत्त्यर्थं इति नपुंसकविशेषणानां युक्तवद्भावो यथा स्यात् । स
मानाधिकरणत्वात् । इह समानाधिकरणाद्विशेषणानां युक्तवद्भावो भविष्यति । य
160 थैव नार्थेन नलुपोन्यत्रापि जाते युक्तवद्भावो न भवति । क्वान्यत्र वरणासु समके रकामधुराव
सहृति । किं पुनः कारणं अन्यत्रापि जाते युक्तवद्भावो न भवति । आविष्टलिंगा जातिर्यल्लिंग
मुपादाय प्रवर्त्तते उत्पत्तिप्रभृति आविनाशात् न तल्लिंगं जहाति । न तर्हीदानीमयं योगो व
क्तव्यः । वक्तव्यश्च । किं प्रयोजनं इदं तन्त्रवोच्यते गुणवचनानीह शाशनमाश्रयतो लिंग
वचनानि भवंति । तदनेन क्रियते । हरीतक्यादिषु व्यक्तिः । हरीतक्यादिषु व्यक्तिर्भवति युक्तव राम
द्भावेन । हरीतक्याः फलानि हरीतक्यः फलानि । खलतिकादिषु वचनं । खलतिकादिषु

वनं भवति पुंस्कवद्भावेनाखलतिकस्य पर्वतस्याः दूरभवानि वनानि खलतिकं वनानि मनुष्यलु
पि प्रतिषेधः ॥ मनुष्यलुपि प्रतिषेधो वक्तव्यः ॥ चंचाभिरूपः वध्रिका दर्शनीयः प्रजा ॥ ॥ तदशिष्यं
॥ ५ ॥ क्रियायाः ताः क्रविमाः इ धुम संज्ञा प्रमाणत्वात् लालार्थशिष्यं नेत्याहुः संज्ञाने संज्ञा ॥ ५ ॥ जात्या
द्दं वा पुंस्कं वन्नेन किं समर्था पुल्लिंगं वहुवचने थाः प्रत्ययपुंस्कं वहुवचनं नैकवचने शास्मिन्नद्ये वहु
वचने प्राप्ते एतदपुंस्कं तत्र वहुत्वे एकवचनं काम्पिल्लिनाम पंके प्रततेन एकत्वनिर्जातप्रत्याख्यायामे
मान्याभिधानार्थं कार्थेऽभिधियाति ॥ ॥ ब्राह्मणो हि श्रीहिर्लब्धः पच्यते गार्ग्यो गार्ग्यालं नरेंकं जातु
लिवस्थितं तस्मै कल्पतर्हेकवचनमेवशास्त्रोनिदद्धानेववहुवचनस्मात्ऋजिनश्चोनरेगा सम्पन्नाः
प्रतेनानिडान्यार्थ्यामेकस्मिन्वहुवचनमेवमस्ति सिद्धमुच्यते ॥ अस्मिन्प्रयोजनमेतावत्किं तदर्थं
मितानैकवचनार्थे चनेऽकिमुक्ते ॥ ब्रीहिभ्य आगतानामित्यत्र छोरिति निशुगाः शास्त्रोऽनि नैष
शेषः ॥ अर्थात् जिरेशाल्लिर्ह्लं ॥ अर्थानिदेशो यं नेदं पाणिनिकस्य वचनस्य ग्रहणात् किं नाहि अ

मा०१ यूयं यशांत्वयानो वचनं वहूनामर्थानां वचनं वहुवचनमितिमिमायावहुत्वाद्देकार्थो वहुवद्भवतीति जा
वदेकस्मिन्नु वहुवचनमितिसिंहा प्रयोगप्राप्तौ विधोवक्तव्यः। एको ब्रीहिः संपन्नः। सुभिक्षं करो
तीति एको यवः संपन्नः सुभिक्षं करोति अस्मदो नाम युष्मत्प्रत्यययो स्तुः। अस्मदो नाम प्रयोग
161 युष्मदा प्रयोगे वचनतिषेधो वक्तव्यः। एको नाम प्रयोग अहं देवदत्तो ब्रवीमि। अहं यज्ञदत्तो
ब्रवीमि। युष्मत्प्रयोगे अहं गार्ग्यायणो ब्रवीमि। अहं वात्स्यायनो ब्रवीमि। युष्मद्। ए
ननार्थः। अस्मदो नाम प्रत्ययप्रयोगे नेत्यव द्विरमपि सिद्धं भवति अहं गार्ग्यो ब्रवीमि। अहं वा
त्स्यो ब्रवीमि। अपृष्ट्याह अस्मद्दसविशेषणस्य प्रयोगे नेत्येवाइदमपि सिद्धं भवति। अहं पं
डुतो ब्रवीमि। अहं पटुर्ब्रवीमि। आशिष्यः। किंकारणं एवं स्थाभिधानात्। एवं स्थे न हि इत्याप
मिधीयते वहुवत्सान्न युक्तं वहुवचनं। किं युष्मते एवं स्थाभिधानादिति यावता इदानीमे राम
वोक्तं तावत्स्थापयीमा व्याभिधानादेकार्थमिति। तावतिशब्देन हि इत्याभिधानं तावति श

ऽनेनाहिद्व्यमभिधीयते नानिरपि कथं पुनर्न्नर्द्धितेनाभिधानेनाहिद्व्यमभिधीयत इति। एवं क
श्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति। कं विद्धं पश्यसीति स पश्यति। पश्यसीति बा
लं गाः पृच्छति वत्कां विद्धां पश्यसीति निन्ह नमस्पद्व्यं। विकल्पितं अभिनितद्यदाद्व्याभिधानं तद्ब
हुवचनं भविष्यति। यदा सामान्याभिधानं तदैकवचनं भविष्यति॥ ॥अस्मदो द्वयोश्च॥ ॥अ
स्मदर्थयोगः शक्योऽवक्तुं। कथं अहं ब्रवीमि आवां ब्रूवः इति वयं ब्रूम इति इह त्रियां ताकदा वि
स्मिन्नाने अर्थे शाविवक्षितानि भवन्ति। तथाऽहं च मे कथं पृच्छति। अयं मे कथाः पृच्छत लोकि
कदाचित्साररतां अर्थे ताम्यनेनाऽर्थात् पृच्छति शब्दाभिधानेन कर्त्तृन पृच्छति यो मितः यथा साता नेत्र
विवक्षितत्वाद्बहुवचनं भविष्यति यदा पारतेऽविवक्षा तदा एकवचनं द्विवचनं भविष्यतः॥
फल्गुनी॥ ॥अयमपि योगः शक्योऽवक्तुं कथं। उदिते पूर्वे फल्गुन्यौ उदिताः पूर्वाः फल्गुन्यः
उदिते पूर्वे प्रोष्ठपदे उदिताः पूर्वाः प्रोष्ठपदाः। फल्गुनीसमीपगते चन्द्रमसि फल्गुनीशब्दो व

नथ

मा०१ न्तिवहवस्तेर्थास्तत्रपुत्रं वहुवचनं प्रदातयोरेकार्थियानंतरा द्विवचनंमविष्यति ॥ छंदसिपुन
र्वस्वोरेकवचनं ॥ ॥ विशाखयोश्च ॥ ॥ इमावपियोगौ शक्याववक्तुं कथं । पुनर्वसुविशाख
योः स्तुणं सुलुकपूर्वसवर्णाइस्तुतं । पुनर्वसुविशाखयोः सुणं सुलुकपूर्वसवर्णाइत्येवसि
द्धं ॥ ॥ तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे ॥ ॥ तिष्यपुनर्वस्वोरितिकिमर्थं । कृ[illegible]ने कारोहिण्यः ॥ नक्ष
त्रइतिकिमर्थं तिष्यश्चमाणावकः पुनर्वसुश्चमाणवकौ तिष्यपुनर्वसवः [redacted]
162 तिवर्त्तमानेपुनर्वसू नक्षत्रद्वंद्वे [redacted]
तिष्यपुनर्वसवः । अश्वत्थनक्षत्रइतिवर्त्तमानेपुनर्नक्षत्रग्रहणं किमर्थं । अपरे तिष्यपुनर्वसु
शब्दोस्मेवरूपो लिपिवर्त्तते । आमिकालवाचीवहव[illegible] तिष्यपुनर्वसवो निक्रांताः कालेरुण
तिष्येणागनइतितथोऽस्पो जिविवर्त्तनेतत्स्येद्वंद्वग्रहणं यथा विज्ञायेत नक्षत्रवाचनस्यइतिवर्त्त
मानेपुनर्नक्षत्रग्रहणस्येतत्प्रयोजनं विद्रेशस्पमापिपतिष्यपुनर्वस्वोः कार्यं निरूपितं स्वत्म राम

सैवपयासान्तिष्यपुनर्वस्वोर्नक्षत्राद्विष्यलोपो वाच्य इति न नक्षत्रग्रहणं न कर्त्तव्यं भवति । अ
थवा नक्षत्र इति वर्त्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं तिष्यपुनर्वस्वोः पर्यायो यथा वि
ज्ञायेत पर्यायो मा भूदिति तिष्यपुनर्वस्वोर्नक्षत्रसमासे इति किमर्थं मा भूत् तिष्यस्तोषपुन
र्वसू च ये जाता इति तिष्यपुनर्वसवो माणवकाः । बहुवचनस्येति किमर्थं ।। उदितमिदं तिष्यपु
नर्वसु कथं वत्रैकवचनं जातिर्द्वन्द्व एकवद्भवतीति अप्राणिनामिति प्रतिषेधः । शास्मेनि
त्यं तर्हि सिद्धं समिति यः बहुवचनग्रहणं करोति तज्ज्ञापयत्याचार्यः सर्वोऽपि द्वन्द्वो विभाषै
कवद्भवतीति । कि मेतस्य ज्ञापने प्रयोजनं वाथ्रबदरानं कायपनाडुत्येव सिद्धं भवति । अश्व
वानाश्च भवेतः शालिनः । अश्वा एवाश्च भवतः ।। इति श्रीमद्भगवत्पतञ्जलिविरचिते व्या
करणमहाभाष्ये प्रथमाध्याये द्वितीयपादस्य द्वितीयमाह्निकं ।। सरूपाणामेकशेष ए
कविभक्तौ ।। रूपग्रहणं किमर्थं समानानामेकशेष एकविभक्तावितीयत्युच्यमाने यत्रैवे

वाक्यशास्त्रं कपनं ४

भा॰ १ व सर्वे समानं राद्ध्यार्थश्च नैव स्यात् ह्रस्वाः लक्षाः यतिः इह न स्यात् हंसाः पाशाः माषाः इति सरूपग्रह

णं पुनः । किं प्रमाणेन देशो भवति सरूपाणि भिन्नत्वेनाश्रीयन्ते अन्तोत्र सरूपग्रहणम् । एकग्रहण

किमर्थं सरूपाणामेकशेष एकविभक्ता विती(?) यत्तु व्यमाने द्विवहोरपि शेषः प्रसज्येत एकग्रह

णं पुनः किं प्रमाणेन देशो भवति । अथ शेषग्रहणं किमर्थं सरूपाणामेकविभक्तौ

द्वितीयत्तु व्यमाने आदेशोयं विज्ञायेत नत्र को दोषः अश्वश्चाश्वश्चाश्वौ अश्वानर्थानो

द्रुद्रानेव तः स्थानिनो द्रुवोनैवानादेशः प्रसज्येत लोप्यलोपिता न प्रकल्प्येत तत्र को

दोषः गर्गा वत्सा विदा उर्वीः प्रयोग बहुत्वे बहुत्व इष्यमानो लुङ् न प्राप्नोति मा

भूद्देवं प्रत्ययान्तं बहुषु च तत्र प्रयोगबहुत्वे भविष्यति नैवं शक्यं इह हि दोषः स्यात् । काश्य

पश्च प्रतिकृतयः काश्यपा इति । एकविभक्ताविति किमर्थं पयः पयो जरयति वाससी रोम

वाससाच्छादयति ब्राह्मणाभ्यां भोजय ब्राह्मणाभ्यां देहि । किमर्थं पुनरिदमुच्यते । प्र

ने२

पर्थशब्दनिवेशान्नैकेनानेकस्याभिधानं प्रत्यर्थं शब्दाभिनिवेशान्नेकिमिदं प्रत्य
र्थमितिनाम्नत्रेष्ठमर्थं प्रति प्रत्यर्थं शब्दनिवेशे नानेकस्याकारणात्सौके न शब्देनानेकस्या
र्थस्याभिधानेऽप्रामाणिकत्वदोषः तत्रानेकार्थाभिधाने नेकशब्दत्वे तत्रानेकार्था
भिधानेनेकशब्दत्वेऽप्रामाणिरिदमनैवैकेनाप्यनेकस्याभिधाने स्यादित्तितथा न रेणपत्वं
नामिधानं तस्मादेकशेषपत्रद्वयं मिदमुक्तमनेपास्ति शयोलनमेता किं तर्हि नित्यं किमि
दं प्रत्यर्थं शब्दाभिनिवेशांत इत्येवं दर्शनमाश्रित्य सरूपाणामेकशेषस्त्रारभ्यते तेन प्रत्युत्तः
प्रत्यर्थं शब्दाभिनिवेशांत इत्येवं दर्शनमाश्रित्य विरूपाणामनेकशेषश्चारभ्यते तेनैव न प्य
नलधीयसौ सरूपनिवृत्तिः नरीयसौ विरूपस्य तिप निरितिनानघनलधीयसौ विरूपस्यति
वृत्तिः किं कारणं यत्राहि बहूनां सरूपाणामेकः शेषः शिष्यते नेतरावतरतः दृष्टोः सरूपयोर्नि
वृत्तिर्यत्र बह्वीनामसरूपाणामनेकः शेषः किं विदायार्थः सुकरत्वं मत्ते सुक सरूपं वैकशेष

न२१ ना१

मा०१ रं भं मन्यते किं पुनरयमेकविभक्तावेकशेषो भविष्यति । एवं भवितुमर्हति । एकविभक्ताविति
वेन्ना भो वा न विभक्तेः । एकविभक्ताविति वेन्न । किं कारणं । अभावाद्विभक्तेर्न हि समुदाया
त्परं विभक्तिरस्ति । किं कारणं । अप्रातिपदिकत्वात् । ननु चार्थवत्प्रातिपदिकमिति प्राति
164 पदिकसंज्ञा भविष्यति । नियमात्र स्मो ति । अर्थवत्समुदायानां समासग्रहणं नियम
मार्थमिति । यदि पुनः पृथक् सर्वेषां विभक्तिपरतामेकशेषः छउ अयाने पृथक् सर्वेषां
मिति चेदेकशेषे पृथग्विभक्त्युपलब्धिः सदाश्रूयतां । पृथक् सर्वेषामिति चेदेकशे
षे पृथग्विभक्त्युपलब्धिः प्राप्नोति । किमुच्यते एकशेषे पृथग्विभक्त्युपलब्धिरिति यदा समस्त
यः । कि... येन केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति न दोषः प्रत्ययलोप्या भोनिना
पचा हि प्रकृतिर्निमित्तं प्रत्ययनिवृत्तिः । अर्थान्तरात् प्रत्ययकाराः प्रकृतेः प्रयोगो भवति अथ रम
विन्मो मप्रुद्दित न यथा पचनवप्रत्ययनिमित्ता प्रकृतिनिवृत्तिर्मित्ता प्रकृतिकस्य प्रत्यय

नर

सप्रयोगो भवतीत्यधुनाद्यान्तानि यथा। अलुसंयोगान्तलोपे सिद्धं कुतो नु खल्वेतत्प
रयोर्द्वन्द्वशब्दयोर्भिन्नवृत्तिर्भविष्यति न पुनः द्वन्द्वयोरिति। नैवैतन्म्यान्मूर्धनिहृत्वावपि सप्यासं
योगान्तलोपेन सिद्धमिति नि न सिध्यतीति यावरतो द्वयोः मकारयोः अवर्णांश समडपेताप्यव
संयोगान्तलोपो नास्तीति तत्र वचनात्सिध्यति। एकवसंयोगान्तलोपो नास्ति द्विवचनबहुवचन
योः। पथिष्वपुनः समासएकशेषव्यपेतो किं कृते भवतीति कस्मिंश्चिद्वचनलोपः परिहृतो भवति।
तत्राह समासग्रहणं कर्तव्यं न कर्तव्यं एकं न मन्तव्यं नित्यं कृतं तिष्ठेत्पुनर्वर्णो नसूत्रं द्वंद्वे
बहुवचनस्य द्विवचनं नित्यमिति समासइति चेत्सवररत्न समासान्ते चुद्रो घः समासइति वेतस्त्व
इसमासान्ते चुदेशो भवतीति। अप्रविश्यात्शृङ्खलां श्यो समासान्तो दान्तलेकृते एकशेषः प्राप्नोति
इदमिह समप्रधानं समासान्तो दान्तलोके पनं एकशेषइति किमत्र कर्तव्यं परत्वात्समासान्तो
दान्तलेसमासान्तो दान्तलेव द्वे भवति सर्वत्रः समासान्तः। अपक्वान्नं क्वेनायो समासान्ते कृते

भा-प्र- ऋमारूप्यादेकशेषोनप्राप्नोतिद्वन्द्वमिहसंप्रत्यार्थेसमासा किंप्रयोजनमेकशेषइतिकिमत्रकर्तव्यं
परत्वात्समासांतःसमासान्तेवरीऽकोभवति।अंगाश्रयेचैकशेषवचनेअंगाश्रयएवकार्येए
कशेषोवक्तव्यः।स्तसापवस्त्रमारोवस्त्रमारः।अंगाश्रयेवक्रकृतेसारूप्यादेकशेषोनप्राप्नोति
द्वन्द्वमिहसंप्रत्यार्थेअंगाश्रयेकिंप्रयोजनमेकशेषइतिकिमत्रकर्तव्यंपरत्वादङ्गाश्रयम्।लिङ्ग
165 समासेलिङ्गसमासवचनं।लिङ्गसमासेलिङ्गसमासोवक्तव्यः।एकंलिङ्गग्रहणमनर्थकंसमा
सेलिङ्गसमासइत्येतन्नानर्थकं।लिङ्गसमासेप्रकृतेलिङ्गसमासोवक्तव्यः।लिङ्गविधिप्रतिषे
धश्च।लिङ्गवचनाश्रयोविधेयःकार्याश्रयाःप्रतिषेधाःप्रवर्तिप्रवर्तिवर्णवतः।जसशशोविधेयः।निश्च
द्भःप्रतिषेध्यः।यदिपुनरसमासेएकशेषश्चेत्येनत्समासेवचनलोपः।यदसमासेवचनलो
पोवक्तव्यः।ननुयोगात्तेनैववचनलोपंवीदितानाःसमा।द्विवचनबहुवचननिपिपिद्धद्वन्द्वशतिषेधश्चोक्ति २।।
वक्तव्यतितरद्वन्द्वस्यनश्चोघ्नतेद्विवचनबहुवचनविधिः।द्विवचनबहुवचनानिविधेयानिद्वन्द्वस्य

वृक्षौ च वृक्षश्च वृक्षाः इति । द्वंद्वः इति निषेधश्च द्वंद्वस्य बहुत्वनिषेधो वक्तव्यः । वृक्षश्च वृक्षश्च वृक्षौ ।
वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः इति वार्थे द्वंद्वः इति द्वंद्वः प्राप्नोति नैकशेषः । अनवकाश ए
कशेषः द्वंद्वो वा विधीयते सावकाश एकशेषः कोवकाशः । सिद्धे नान्यवकाशः यदि पुनः
सर्वेषां विभक्त्यन्तानामेकशेषः स्यात्तर्हि किं कृतं भवति । कश्चिद्वचनलोपः परिहृतो भवति ।
विभक्त्यन्तानामेकशेषे विभक्त्यन्तानामेव तु निवृत्तिर्भवति । एकविभक्त्यन्तानामिति तु पृ
थग्विभक्तिप्रतिषेधार्थम् । एकविभक्त्यन्तानामिति तु वक्तव्यं किं प्रयोजनं पृथग्विभक्तिप्र
तिषेधार्थम् । पृथग्विभक्त्यन्तानां मा भूत् ब्राह्मणाभ्यां च देहि ब्राह्मणाभ्यां च कृतं । न वार्थवि
प्रतिषेधात् युगपद्वचनाभावात् नैकशेषः किं कारणं अर्थविप्रतिषेधान्न विप्रतिषिद्धं
वेनावस्थी । कारणं सं शब्दानामिति अशक्यो युगपदभिधातुं तयोर्विप्रतिषिद्धत्वात् युगप
द्वचनं न भविष्यति । अनेकार्थाश्रयस्तु पुनरेकशेषः अनेकमर्थं युगपत्प्रत्याययिष्यामीति एके

भा०१ शेषस्यारम्भतो जस्मान्नैकशब्दत्वं नस्मादेकशब्दत्वं न भविष्यति। अयं तर्हि दोषः कास्थुह्त्वा-
न लोपः। द्विवचनबहुवचनविधिः। इद्धत्वजि घेयस्त्वेति पदि पुनः प्रातिपदिकानामेकशे-
षेत्र्ये न किं कृतं भवति वचनलोपः परिहृतो भवति। प्रातिपदिकानामेकशेषे मान्त्रमा-
नोः इतिशेषः सकृत्प्रात्। प्रातिपदिकानामेकशेषे मान्त्रमाज्ञोः इतिशेषो वक्तव्यः। मा-
166 नावत्तनापि चीयता नस्य मातारो वमात्स्मातारः। किं कारणं। मरूपत्वा मत्सरूपाणि ह्ये-
तानि। प्रातिपदिकानि किं स्युः। प्रातिपदिकानामेकशेषे मान्त्रमाञ्चोः। प्रतिशेषो वक्त-
व्य इति न पुनः विस्यापि विभक्तौ ते नानामेकशेषस्तेनापि मान्त्रमाञ्चोः। इतिशेषो वक्तव्यः। स्या-
न्तस्मापि हि ते नानि छविछि भक्तौ नानि सरूपाणि मान्त्रं मान्त्रणा वेति। अथ पूमनन्म-
मतां हि भक्तं तानां मारूप्यमभवितव्यमेवैकशब्दत्वं प्रातिपदिकानामेवैकशेषो भव- राम
ति एवं च कृत्वा वोधते हरितहरिणा श्येन श्येनरोहितरोहिणा नां द्विपा तु पसंख्यानं हरि

रोहितस्य स्त्री रोहिणी रोहिता स्यात् पि ३

नहरिणारूपेन रूपेन रोहितरोहितानां स्त्रियामुपसंख्यानं कर्तव्यं हरितस्य स्त्री हरिणी हरिता स्या
पि हरिणीव हरिणीव हरिणोरूपेन स्त्री रूपेणी रूपेन स्यात् पि रूपेणी रूपेणीव रूपेणीव रूपेणीव र
[illegible] रोहिणीव रोहिणीव रोहिताके। न वा पदस्यार्थे प्रयो
गात्।। न वा कर्तव्यं किं कारणं पदस्यार्थे प्रयोगात् पदमर्थे प्रयुज्यते विभक्तं वपदं रूपं वेहाश्री
यते रूपनिर्देश इह श्रूनान्तरेण शब्दस्य लौकिकं प्रयोगं तस्मिंश्च लौकिके प्रयोगे समरूपा रूपेता नि
यतः।। आह न वा पदस्यार्थे प्रयोगात्।। न वा एवं सति एवा स्त्रिशानि पदिकानामेकशेषः इति किं
कारणं पदस्यार्थे प्रयोगात् पदमर्थे प्रयोज्यते सुवंते वपदं रूपं वेहाश्रीयते रूपनिर्देश इह श्रूनां
तरेण शब्दस्य लौकिकं प्रयोगं तस्मिंश्च लौकिके प्रयोगे प्रातिपदिकानां प्रयोगो नास्ति प्रया
नेन पदनैरतार्थः स्यात् प्रातिपदिकानामेकशेष इति नारूपमर्थः।। एवं तर्हि कर्मणेन नाहि कथमतु
समानेभ्यस्येता पतेनैवाभिहितं सर्वे तासरूपाणामेकशेष एककाभिभक्तावित्याकथंविम

भा०१ त्रि:॥ सारूप्योत्॥ श्रीयमे॥ अनैमित्तिक एकशेषः एकविभक्तौ यानि सरूपाणि तेषामेकशेषो
भवति कथं तत्र वेति। अस्थाने न पूर्वेत्॥ पूर्वः स्यात्। द्विभक्तौ नानामेकशेषः इति वाच्यम॥ हिः किं वच
अमनन्त्र हि कथमनुमानं गंभ्यते एन दष्यने नैवाभिहितं सह्वे॥ सरूपाणामेकशेषः॥ ए
कविभक्तौ विति। कथं नेदं पारिभाषिक्या विभक्तेर्ग्रहणं किं तर्हि प्रलब्धि ग्रहणं विभागो विभ
क्तिरिति। एकविभागे यानि सरूपाणि तेषामेकशेषो भवति ननु यो के अयम हि दोषः काष्ठ
द्वचनलोपः द्विवचन बहुवचना विधिः दंडशाति षेधश्चेति नैष दोषः पन्नावद्व्यनेकाष्ठि द्वन
लोपः द्विवचन बहुवचन विधिरिति। सर्वं विवक्षायामेकशेषः पुनरपि द्विवक्षायामेकशेषो
भवितव्यं न हि यानीमिदं भवति वृक्षश्च वृक्षश्च वृक्षौ वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति। नैतदस्ति सह
विवक्षायां भवति। अथवा पि निर्दिशायितुं बुद्धिरेवं निर्दिशाथि नम वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा
वृक्षश्च वृक्षाश्च वृक्षाइति यद एषु व्याने द्वंद्वस्य पाति षेधो वक्तव्य इति नैष दोषः परिहृत

स्मेतत् अनवकाश एकशेषो ऽद्वंद्वं वा विप्रतिषेधेन तु बोध्यं सावकाश एकशेषः कोऽवकाशः लिङ्-
गान्यत्ववकाशः । न लिङ्गमात्रे एकशेषारंभप्रयोजनं किं कारणं यथाजातीयकानां द्विती
यपदस्य प्रयोगे सामर्थ्यमस्ति न तथाजातीयकानामेकशेषः न च लिङ्गमात्रेणाद्वितीयस्य
पदस्य प्रयोगे सामर्थ्यमस्ति । किं कारणं एकार्थाहि क्रियानस्मा एकेनोक्तत्वान्न तस्यार्थस्य द्विती
यस्य पदस्य प्रयोगेणानभिहितत्वं तत्रार्थानामप्रयोग इति । यदि तर्हि एकाक्षिपाद्विवचनब
हुवचनानि न सिध्यन्ति । पुत्रनः पत्नौति नैतानि क्रियापेक्षाणि किं तर्हि साधनापेक्षाणि । अथ
वा पुनरस्त्वेकविभक्तावित्ति नतु बोध्यमेकविभक्तावित्ति वचनाभावाद्विभक्तेर्यति नैषदोषः प
रिहृतमेतत् अर्थवत्सामान्यादिकमिति प्रातिपदिकस्य संज्ञा भविष्यति । नतु बोध्यं नियमार्थमप्रा
शोऽस्ति अर्थवानसमुदायानामसमासग्रहणं नियमार्थमिति । नैष दोषः तुल्यजातीयस्य नि
यमः कश्च तुल्यजातीयः यथाजातीयकानां समासः कथं जातीयकानां समासः सुबन्तानां ।

भा॰श सर्वत्रापत्यादिरूपसंख्यानं। सर्वापत्येष्वपत्यादिरूपसंख्यानं कर्तव्यं। मिश्राणां समूहो मैत्र्यामिति। सर्वत्रि
क्रियते प्रातिपदिकानां वेकशेषसिद्धं। अपत्यादिविस्तुवत्र नेव बहुवस्थापत्यादयः गार्ग्यापत्यं व
हवो गार्ग्याः। एकावशक्रजिः बहवस्तु यस्काः समानरूप्यादेकशेषो न प्राप्नोति। ननु बहुषु एकवाह
वा यस्काः एवं शक्लनयोपि बहुषु स्तुः नैवं शक्यं इह हि दोषः स्यात् गार्ग्याः वत्साः विदाउर्वादिभ्यः। यस्माव
168 हु बुअस्लो बहुष्विस्तु समानेलुक् न प्राप्नोति। मा भूदेवं यस्के नेय बहुषु अयनेय बहुषु इमे वंमपि
स्याति। ननु वोक्तं नैवं शक्यं इह हि दोषः स्यात् काश्यपप्रतिकृतयः काश्यपा इति। नैष दोषः। लौकि
कस्य तत्र गोत्रस्य ग्रहणं। न चैतल्लौकिकं गोत्रं। अथवा पुनरस्त्वेकाशक्रजिः बहवस्तु यस्काः। ननु वा
कासमानरूप्यादेकशेषो न प्राप्नोति। सिद्धं तु समानार्थानामेकशेषवचनात्। सिद्धमेतत् कथं
समानार्थानामेकशेषो भवतीति वक्तव्यं। यदि समानार्थानामेकशेष उच्यते कथं मातापि राम
तरौ इति। नानार्थानामपि सरूपाणां। नानार्थानामपि सरूपाणामेकशेषो वक्तव्यः।

नेकशेष। सरूपाणा[illegible] सहात्यपादेय शेषेन भविष्यति तेनद्वोफा विरूपेन नार्थागमा त[illegible]ता पादा यल्वो[illegible]

कार्थानामपि विरूपाणाम्। एकार्थानामपि विरूपाणामेकशेषो वक्तव्यः। ऋस्थायस्थायो। किमयं
वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ वा विनिवा। स्वरभिन्नानां यस्योत्तरस्वरवि
धिस्तस्यैकशेषो वक्तव्यः। आसन्द्यासन्द्यासौ। मामासकश्च मामासकश्च मामासकौ। इहकस्मान्न
भवति। एकस्य पृकस्य द्वौ वद्वौ वेति। संख्यायाश्च अर्थासंप्रत्ययादन्यपदार्थत्वाच्च संख्यायाः पृकशेषो
न भविष्यति। पृकस्य एकस्य तु पृषद्वाविप्रतिषेधः। द्वौ वद्वौ वेत्पस्य वलाबलत्वप्रतिषेधः। नैतो स्तः परिहारो। य
न्नावदुच्यते संख्यायाश्च अर्थासंप्रत्ययादिति। अर्थासंप्रत्ययेऽपि हि सति एकशेषो भवति तद्यथा। गा
र्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। न चोच्यते वृद्धयुवानाविति भवति चैकशेषः। यदप्युच्यते आन्यपदार्थत्वा
दिति अन्यपदार्थेप्येकशेषो भवति तद्यथा विंशतिश्च विंशतिश्च विंशती। न चैषा स्थूलादिशब्दप्रतिषेधः।
एवं तर्हि नेमौ एकस्य परिहारौ पृकपरिहारोऽयं संख्यायाश्च अर्थासंप्रत्ययादन्यपदार्थत्वाच्चेति। यत्राप्य
र्थासंप्रत्ययश्च एव चान्यपदार्थे नैव चापि भवति नत्वेकशेषः गार्ग्यौ विंशती इति। यथा अर्थवानेमए

भा·२ कषायशब्दाः यदि तर्हि नेमे एकशेषशब्दाः समुदायशब्दाः समुदायशब्दाश्चेत्तर्हि समवेतानि तत्र कोऽसौ एकशेषः एकवचनं प्राप्नो-
ति एकार्था हि समुदाया भवन्ति न यथा पृथक्त्वं शतेवनामिति संतु नर्थैकशेषशब्दाः । किं कृतं मातृरूप
मन्योन्यकृतं मातृरूप्यं । मैनि पुनः कोविदन्यो विशब्दायष्ठामन्योन्यकृतो भावः । मैनीत्याह मातापिता
भ्रातेति । विषमरूपत्वात्सः । सकृद्दत्ते शब्दाः प्रवर्त्तन्ते अपायेऽपि प्रवर्त्तन्ते इह पुनरेकेनाप्यपाये न
भवन्ति बलाहकवत् । अन्यादिशब्दो मे तत्तु व्यक्ते सकृद्दत्ते प्रवर्त्तन्ते अपायेऽपि वर्त्तन्ते तद्वत् । यत्तु भवान
न्योन्याश्रयत्वात् निसर्गं पुनः कोविदन्ये शब्दाय षष्ठामन्योन्यकृतो भावइति । तत्रोक्तं स्मात्लिङ्गरूपस्याः
तथैतद्वा नाहं सकृद्दत्ते शब्दाः प्रवर्त्तन्ते अपायेऽपि वर्त्तन्ते इति पञ्चवार्त्तं एकैकोनोपैतु मात्र
शाक्रोमि एलकथं तथैकैकको नीस्यात्सर्वे वा स्युः कथं पुनः । कारणान्तु घमनं वेश्रो घष्ठ निवान्तरे
त्वात्तुल्यं । तस्मात्सर्व कुर्वन्ति कतरः समव्यपेक्षानुशब्दं समसंख्यमोन्नमानामेकशेषोऽसमस्- रामा
त्वात्स्वत्वसमव्यमोन्नमानामेकशेषोवक्तव्यः । पचति वपपचति पचत्यपचति पचतिवपवा

कः। एवं तर्हि पचति पचसि पचामि पचावः पचामः। किं पुनः कारणं न सिध्यति। असरूपत्वात्। द्विवचनबहुवचना
प्रसिद्धिरेकार्थत्वात्। द्विवचनबहुवचनयोश्चाप्रसिद्धिः। किं कारणं एकार्थत्वात्। एकोयमर्थः शि
ष्यते तेन अनेनान्तरेणार्थेन भवितव्यं। किमर्थं न यदर्थं एकः। किमर्थं श्रुतः एकः एकार्थः। नैकार्थ्या
नायमेकार्थः। किं तर्हि द्व्यर्थो बह्वर्थश्च। नैकार्थ्यमिति वेदारंभानर्थक्यं। नैकार्थ्यमिति वे
दकशेषारंभोऽनर्थकः इह हि शब्दस्य स्वाभाविकोऽनेकार्थतास्ति। तथा वावनिकोव्यानघूर्दिता
वत्स्वाभाविको अशिष्य एकशेषः एकेनोक्तत्वात्। अशिष्य एकशेषः। किं कारणं। एकेनोक्तत्वा
त् तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यं उक्तार्थानामप्रयोग इति। अथ वा वानिको
न इदं न्याय्यमेकोयमर्थः शिष्यते सर्वदार्थो भवति। बह्वर्थश्चेति। न च कश्चित्सिद्धमेकशेषश्चैव
एकशेषारंभाद्विष्यति। कथं पुनरेकोयमवशिष्यते इतरेण नेन द्व्यर्थतावह्वर्थतावा शक्यालं
ब्धुं न चैकशेषकृतेनान्येनैतरेणानह्याविनः शब्दस्य प्रयोगं न स्यादर्थस्यागतिर्भवति। पश्यामश्च [illegible]

भा॰श्र नरं जरेणापि तद्भाविनः शब्दस्य प्रयोगं न स्यात् पर्वस्य गाजि भवति। अथ वित्तो मसकादि जिय थाने मन्या
म हेतो पकृत मेतन्नये नान रणापि तद्भाविनः शब्दस्य प्रयोगं न स्यात् छिस्य गाजि भवतीति एवमपि
ह्यापि एकशेषः कृत मेतत्तये नात्र एको यमवशिष्यते द्वयमने नरार्थं नावढु पर्यतामवतीति वोन
जाहि न नु गमपेन यो हि गामभ्याहतिब्रूयात् अश्वं वा मे हि जिन लानु यि न्तस्मरणपयः स्यानेनाने
कार्थाभिधाने यत्नं कुर्वन्तम् अत्र वयं लोकः पृष्टोऽनुगन्तव्यः केष्वर्थेषु लौकिकाः कान् शब्दान्
170 प्रयुञ्जते इति लोके येकस्मिन् च स इति शब्दं युञ्जते द्वयोर्द्वाविति बहुषु बहव इति यदि नाह लो
कोऽवशं शब्देषु प्रमाणं किमर्थमेकशेष आरभ्यते अथ किमर्थं लोप आरभ्यते प्रत्यय ल
क्षणो वा यथः प्रार्थयमानो लोपमारभ्यते एकशेषोऽरभ्येत नरम्पन किंचित्प्रयोजन मास्तिान
नुवोनं प्रमर्थं शब्दनिवेशात्रे केनामेकस्याभिधानमिति। यदि वै केनानेकस्यार्थस्याभिधा राम
नं स्यात् तन्नानार्थं शब्दनिवेशः कृतः स्यात्। ?र्थं शब्दनिवेशात्मे केनानेकस्याभिधानान्न

यावतामर्थानामभिधानं भवति तावतामभिधाने प्रयोग इत्येवं ५ ०

शक्यार्थाभिनिवेशेन नरादिपदस्यार्थमेव प्रत्यर्थं शक्तिनिवेशान्नैकेनानेकस्याभिधानासम्भवात्प्रत्य
र्थाभिनिवेशन एव तु व्यक्तेयरस्यैकेनानेकस्याभिधानं भवति नरादिपदस्यार्थमेवापरादिपदस्य
ध्यायर्थौ नरादिपदस्यार्थमेव यदादिपदस्यार्थानर्थान्तरस्य नरादिपदस्यार्थमेव। यावतामभिधा
नं तावतां प्रयोगो न्याय्यः। यावतामभिधानं तावतां प्रयोग एव पर्यन्तो न्याय्यः। यावतामभि
मिधाने तावतां प्रयोगो न्याय्य इति चेदेकेनाप्यनेकस्याभिधाने यावतामभिधाने तावतां
प्रयोगो न्याय्य इति चेन्न। एवं तु व्यक्तेऽपि न्याय्य एव यदस्यैकेनानेकस्याभिधानं भव
ति यदि तर्ह्येकेनानेकस्याभिधानं भवति। अन्यत्र न्यग्रोधे। एकेनानेकत्वादिपरस्य प्रयोगोऽनु
पपन्नः। एकेनानेकत्वान्नस्यापि स्यापरस्य प्रयोगानाभावित्वं किं कारणं तु न्यायानाम प्रयो
ग इति। एकेनानेकत्वादिपरस्य प्रयोगोऽनुपपन्न इति चेत्तु न कालान्तरे सन्न्यग्रोधस्य नाग्र
प्रयोगः। एकेनानेकत्वादिपरस्य प्रयोगोऽनुपपन्न इति चेन्न अन्तु कः सन्न्यग्रोधार्थ इ

मा॰ निष्कलोन्यथोपशान्तःस्युरुक्तेनोकथमनुगमः यदिद्दानीमेवोक्तं एकेनानेकस्याभिधा
नंभवतीति स्वरूपाणामेकेनाप्यनेकस्याभिधानंभवतिनविरूपाणां किंपुनः कारणं।
स्वरूपाणामेकेनाप्यनेकस्याभिधानंभवतिनतुनर्विरूपाणां असिधानेपुनः स्वामा
।७। विकंस्याभाविकमभिधानानंभवदर्शनानुगमं यं स्वल्वापि दृश्यते। विरूपाणामप्ये
केनानेकस्याभिधानंभवतीतितन्यथा। द्यावा। द्यावाक्षामा। द्यावाकाविदस्मे पृथिवीनमेते। वि
रूपाणां किलनामैकेनानेकस्याभिधानेस्वानां किंपुनः स्वरूपाणां। आकृत्याभिधाना
द्वैकंविभक्तौवाक्यानां पानः। आकृत्यभिधानादाह एकं शब्दं विभक्तौवाक्यानां पन्न आ वार्प्यो
न्याय्यं मन्यते एका आकृतिः सा विधीयत इति कथं पुनर्ज्ञायते एका कृतिः सा व विधी
यत इति। प्रख्याऽविशेषात्। नहि गोरित्युक्ते विशेषः प्रख्यापनेषु ना। नीला कपिला राम
कपोतिकेति। उपपत्तिर्वा तत्प्रख्याऽविशेषात् ज्ञायते एकाकृतिरिति वचनलोपेन साविधी।

यत्नेऽपि । अपवर्गात्तेष्वा । अपवर्गे गते श्च मन्यामहे । आक्रोजरमिधीयन इति निर्दिष्टोऽपि
रुके अपवर्गो गम्यते श्रुतमानीलाकतोऽपि कनिष्ठाय यत्नेवैकोऽपदिष्टः । ज्ञायते ऽपवर्गे
कोऽपदिष्टो गोरसक्तदाविदुपदिष्टो नवतिमतन मक्षिन्नृशेन्वाक्षिकाले । नासो ववपावस्था
याद्दृष्टेऽनानाक्षिअयनो रितिकः । पुनरस्य विशेषः । शब्दोऽयं शब्दाद्दिनत्तः । नसेवापोद्द
लक मितव्यत्वाद्विशेषप्रतह्या यत्नेवैकोऽपदिष्टमिति । धर्मशास्त्रवत्तथा । एवं वृक्षलाघवमि
त्याह प्रवृत्ते ब्राह्मणो न हन्तव्यः । सुरा न पेयेति ब्राह्मणमात्रं न हन्यते सुरामात्रं च न पीयते ।
यदि च इष्वपदार्थः स्यादेकं ब्राह्मणमहत्वा एको वा सुराम पीत्वा अन्यत्र कामचारः स्यात् । न
नु । पुनरस्य विशेषः अपवर्गगते श्रुतिलिनसो पोद्दलक मनन्वयपवर्गगते श्रुविधिशा
स्त्रवत्प्रेति । अस्ति वैकमनेकाधिकरणस्थं युगपत् । अस्ति चान्यदेकमनेकाधिकर
णस्थं युगपदुपलभ्यते । अप्रकीर्णा ह्याकिमादित्यस्य यथा एकश्चादित्योऽनेकाधिकरणस्थो

भा०
युगपदुपलम्भतो विषमत्वापत्तानेको ह्याहिमनेकाधिकरणस्थं युगपदुपलम्भनेए
वेनहीति इवाद्विषय ानेछ्याएकदेशे नेकास्मिन् अनुरूपशानआहूतो युगपज्ञवत्रिभवति
एवमाकृतिरपि युगपल्लब्धेरमविष्यातिअवश्यंवेनेदेवाविज्ञेयं एकमनेकाधिकरणस्थं
युगपदुपलभ्यने इति नैकमनेकाधिकरणस्थं युगपदिति येनच्छेकशेषापि हि मन्यते ने
172 कमनेकाधिकरणस्थं युगपदुपलभ्यत इत्येकशेषेन स्याद्दोषः स्यादेकशेषे पिनेष्टस
शब्दोऽनेकमर्थं युगपदितिरिधीतम्ब अवश्यं वेनदेवं विज्ञेयं आकृतिरभिधीयत इति द्रव्याभि
धाने स्वाकृत्यसंप्रत्ययः। द्रव्याभिधाने सत्याकृतेरसंप्रत्ययः स्यात् ननु को दोषः न तासर्व
द्रव्यगतिः न तासर्वद्रव्यगतिः प्रसक्त न सर्वद्रव्यगतो को दोषः ओरदृवंध्याऽस्त्रोत्रीषा
मीय इति एकः शास्त्रोक्तं कुर्वीन अपरः अशास्त्रोक्तं अणास्त्रोकेवक्रियमाणे विगुणाक राम
भवति विगुणे च कर्मणि फलानवाप्तिः ननु च यस्याप्याकृतिः पदार्थः तस्यापि य घन

वचनेन बोध्यते न वानुबध्यते विगुणं कर्म भवति विगुणे च कर्मणि फलानवाप्तिः। एकत्वा

श्रुतिरिति चेद्ग्रहनिष्ठाहोयेनेयद्यासम्पदसम्पादने प्रयोजनग्रहं एकशेषेन वक्तुमइति

सर्वत्रानीवक्तव्या भवति। एवंनहि न वचनेन बाध्यते शब्दैकवपरिसमाप्यते पदार्थ हि सः। ननु

यस्यापि इन्द्रं पदार्थमस्मान वचनेन बोध्यते तस्यैकवपरिसमाप्यते एकशेषस्त्वयावक्तव्यः

तथापि न हि द्विवचन बहुवचनानि साध्यानि। बोद्धा नायो वैकस्योपाधिश्च नैः। बोद्धा यो वै

शुकस्योपाधिवन्नैमिम्मा महेश्राक्षणेरभिधीयत इति। आग्नेयमष्टाकपालं वर्त्म निर्वपेदि

तिप्रकं निरूप्यद्विग्नीयश्रुतत्वाय श्रुतिनिरूप्यते यादिवद्युपपद्यते। श्यादेकं निरूप्याद्वितीय

तृतीयस्याप्यवानविपातानप्रकल्पनाकः। पुनरेनयोपदिशिवाहनदोर्विशेषः। एकानिर्वपेन

नवयानिर्वपे[illegible]नेऽप्यपरानिर्वर्तिना। इयामि यानेव्यादिः। इयामि यानेव्यादि

रावार्षेस्मान्यसमना इच्यमभिधीयत इति। तथा च लिङ्गवचनसिद्धिः। एवं यत्कृत्वा लिंग

१ चोदनासु च तस्यार्थं भा॰ मन्यामहे। इत्यमभिधीयत इति गौरनुबंधो ज्ञो गोमीय इति ॰आकृतौ २

भा॰१ वचनानीति सिद्धिर्भवति। ब्राह्मणो ब्राह्मणौ ब्राह्मणा इति। चोदनासु च तस्यार्थं भा॰
चोदिता यां इत्येआरंभणालंभनं प्रोक्षणं विशसनं दाशनं क्रियते। न चैकमनेकाधिकरणस्थं
